# अथ स्तोभानुसंहारः प्रारम्भः

आद्यन्तदर्शनस्तोभो विधा गीतेषु सामसु
पादेपादेऽनुसंहार्यस्सोपायो निधने भवेत् १
आदौ दृष्टश्च यः स्तोभः पादशिष्टः पुनर्भवेत्
ससर्वेष्वनुसंहार्यः पादेषु स्तोभ उच्यते २
अन्वयी चानुषं गीचद्वौ स्तोभावनुकीर्तितौ
अन्वयी तु पदादौ स्यादनुषंगी पदात्परः ३
जगृह्मायां द्वितीयस्य गीतिः स्यादन्त्ययोर्यथा
स्तोभस्य देशसामान्यात् भूयिष्ठापदगीतितः ४
संशानानां परमृचः प्रोक्तमेवं स्वरीयसाम्
अन्त्यवत्तेषु गीतिः स्यादृचा यत्र प्रगीयते ५
सावित्रगोष्ठतिस्त्रोऽस्य तेषां गीतिः पदेपदे
सर्वस्यामृचिगातव्याप्रयोग इति निश्चयः ६
अस्य प्रेषेति पञ्चानामभ्यस्येदुत्तमम्पदम्
सर्वाणि चोत्तमेऽभ्यस्येत्तस्य चैवोत्तमं पदम् ७
वासिष्ठपञ्चमेऽभ्यासं मन्यन्त ऋषिचिन्तकाः
गातातु गौतमो नैतदभ्यासं साधुमन्यते ८
परीतायामुपान्त्यानामुत्तमेन समं भवेत्
तृतीयेन तु तुल्यं स्यात्साहिगीतिः समाहिता ९
प्रधन्वायाञ्चतुर्थस्य तृतीयेन समं भवेत्
पादे पादेऽनुसंहार्यो यथैवान्येषु सामसु १०
संतनितृच उत्पन्नं तृचे वा द्विपदोत्तरे
प्रगाथोवा भवेत् कार्यस्तृचस्थे ककुबुत्तरः ११
ऋषभेशाक्वरेस्तोभः सामाद्य स्यात् पदेपदे
सोपायेन तु तेनैव व्यवेया पददेवते १२

धेनुनः पदमभ्यस्येदुत्तमं लिङ्गदर्शनात्
अनुपायं व्यवेत्स्तोभैस्सागीतिर्वामदेव्यवत् १३
अनभ्यासो भवेदन्त्यः समस्येत् पददेवदे
मरूतां भूतिवद्गीतिरेषाद्बिस्तोभदर्शनात् १४
पाराशर्येण तु न्याय्य उत्तमस्याद्धिदैवतः
यणवेस्तोभानुसंहारे लिङ्गं पादानुकर्षणम् १५
ऋचो यदधिकं किञ्चिद्विरुद्धं वापि दृश्यते
स्तोभत्वं तस्य मन्यन्ते कवयः शास्त्रचिन्तकाः १६ १

संकृतेरनुसंहार एकायेन समो भवेत्
राजनेरौ हिणे वापि स्तोभसंहार इष्यते १
राजनेनुपदं स्तोभः पृथग्वा पददेवते
देवते वा पृथक्स्यातामपिवाप्यर्द्धदेवते २
रौहिणस्योत्तमात्पादात्स्तोभं परमधीयते
शाखास्वन्यासु तस्मात्स विकल्पः संशये पदे ३
देवतञ्च पदं चर्चो यत्रोभे निधनस्वरे
समासस्तत्र कर्तव्योऽग्निमीडे निदर्शनम् ४
अभ्रातृव्यैकविषयो पुनानां गिरसस्य च
आम्नायस्य तु सामर्थ्यादभ्यासैकवृषे भवेत् ५
चतुर्थे तु पदस्तोभे तृतीये प्रथमे पदे
चतुरक्षरशो भिन्द्या द्युग्मौ भिन्द्या द्विधाद्विधा ६
तौ वा त्र्यक्षरशः कुर्याद्युग्मौ च न विकल्पयेत्
भिन्नयोरनुभेदः स्यादेवं द्वादशधा भवेत् ७
अयं पूषा द्वितीयस्य पादान्ते निधनं भवेत्

ततः परो भवेत् स्तोभः पादश्च निधनं भवेत् ८
स्वरीयसां तृतीयस्य विधाः पञ्चर्च उत्तराः
तासां स्तोभोऽनुसंहार्यः पादसिद्धिः समाहिता ९
ऋचं तासु व्यतिष्ठजेत्कार्यस्तोभो विधान्तरे
पादादौ वा भवेत्स्तोभ एषागीतिः समाहिता १० २

अनन्तरस्य साम्नोऽन्तः प्राध्घोताद्यदृचः परम्
पादान्तेष्वनुसंहार्यो गीतिर्यान्याद्द्वितीयवत् १
सर्वेषु व्यतिषंगेषु विधानां साम्यमिष्यते
ऋचिद्विप्रतिहारस्स्याच्छन्दोदेशः स्थमिष्यते २
सत्रस्यर्द्धौ सधस्थे च तथैवांगिरसां व्रते
संहारः पदवद्वृत्तः पुनरन्ते च दर्शनात् ३
आद्यन्तरो यदा स्तोभः पाददैव तयोः परः
सर्वत्र कर्षणात् कार्यो धेनुषाम्णि च नार्चिके ४
राथन्तरमुकारञ्च पादादौ पुनरारभेत्
विष्णोर्व्रतस्य सागीतिर्न्निधनञ्चानुसंहरेत् ५
पादगीतौ तु निधनं सर्वं तदनुसंहरेत्
आम्नातं सात्यमुग्राणां महावैश्वानरव्रते ६
सामाद्यं त्रिपदे वापि त्रिपदं निधनं भवेत्
अभ्यासो वा भवेत् स्तोभैर्द्वितीये वचने पुनः ७
अथ वापि न्यसेत्स्तोभैरभ्यासस्योत्तमे पदे
इत्येवं प्रथमे कल्पे निधनानि त्रयोदश ८
अन्यस्मिन्त्सप्तदशवान्यस्मिन्नेकविंशतिः
पञ्चविंशतिरन्यस्मिन् निधनानि प्रकल्पयेत् ९

दिवा कीर्त्ये परमृचः पदांते ष्वनुसंहरेत्
सौपर्णो नाम संहार एष उक्तः परो विधिः १०
आम्नायेनाल्पभिन्नं तु कर्तव्यं सर्वसामसु
स्मृतेर्लिङ्गाच्च राक्षोघ्ने प्रयोगे यार्चिको विधिः ११
पाञ्चविध्युपपत्तेश्च स्तोभसंहार इष्यते
पदं पदं विधां मात्रां छन्दोविज्ञाय दैवतम् १२
आर्षञ्च ब्राह्मणं चैव ततस्सामप्रयोजयेत्
अक्षरज्ञो विरामज्ञः प्रत्यारंभी तथैव च १३
स्वरमात्राविभागज्ञः सविप्रो गानमर्हति
यश्च व्याकुरुते शब्दान्यश्च मीमांस तेऽध्वरम् १४
सामस्वरविधिज्ञश्च पङ्क्तिपावनपावनाः
अटेतपृथिवीं कृत्स्नां सशैलवनकाननाम् १५
लभेतयदिपित्रर्त्थे साम्नामक्षरचिन्तकम्
किमर्त्थमनुसंहार्यो विधौ पादे पुनर्भवेत् १६
अनग्नत्वात्तु वै साम्नां न्याय एषविधीयते
उद्धारः पुनराचार्यैः स्वाध्याये लाघवार्तिभिः १७
प्रोक्तस्तस्मिन् प्रतिष्ठा च संहारस्तेन इष्यते १८ ३

इति स्तोभानुसंहारः समाप्तः

Reference:
"Stobhānusaṁhāra," in Krishnaswami Srauti, ed. *Chhalaprakriyādayo*, Kumbakonam: Jyotirvilasa Press, 1885.